श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधिस्वामि प्रणीत

# ॥ श्रीचिलुकुरुस्तुतिः ॥

*This document*[*] *has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीचिलुकूरुस्तुतिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

शिलायामेकस्यां जलनिधिभुवा कश्यपभुवा
  विलासं सन्तन्वन् विनतशिवसम्पूजितपदः।
जलाधारप्रान्ते सकलजनसर्वेष्टफलदः
  कलावस्मिन् दैवं जयति चिलुकूर्वेङ्कटपतिः॥ १॥

कविः पुराणः पुनरत्र सत्वं
  वल्मीकजातो ह्रदमध्यवर्ती।
द्वैपायनो वेङ्कटनाथ तं त्वां
  स्तोतुं प्रवृत्तोऽस्मि कविर्विलज्जः॥ २॥

श्रीमन्! चिलुक्कुर् पुरक्लृप्तवास!
  श्रीवास! भूयात्तव सुप्रभातम्।
भक्तैकवश्य! प्रणतार्तिहारिन्!
  प्रभो! दयासागर! लोकनाथ!॥ ३॥

क्षतोऽपि भक्तैरयि! मानिवास!
  तानक्षतं रक्षितुमात्तलील!।
श्रीभूसमालिङ्गितवेङ्कटेश!
  श्रीमन्! प्रभो! नस्तव सुप्रभातम्॥ ४॥

अभ्यागता वेदविदां वरिष्ठाः
  आदाय भक्त्या कुसुमोत्तमानि।
फलानि भव्याक्षतपात्रहस्ताः
  स्वामिन्! चिलुक्कुर्-रत सुप्रभातम्॥ ५॥

क्षीराब्धिमध्ये भगवन्! यथा त्वं
तथैव मध्ये हृदयोरिदानीम्।
वसन्निहैवं विवृणोषि लीलां
तवास्तु सर्वोत्तम! सुप्रभातम्॥ ६॥

समलं जनमागतं पुनः
विमलं कर्तुमिवाञ्जसा भवान्।
कमलावृतमास्थितः पदं
कमलावास! विभाति किं प्रभो!॥ ७॥

विपुलविलोचन! विश्वपते!
विषमविलोचनविज्ञनुत!।
विजयविरोधिविनाशक! भोः
विजयविधां मम देहि विभो!॥ ८॥

क्षीराम्भोनिधिमध्यवासरसिक स्स्वामिन्! परित्यज्य तं
देशे केवलवारिणापरिवृते वासं विधत्से कुतः।
पीडा किन्नु पिपीलिकाभिरभवत् मार्जालबाधा तव
किं वा तल्पविषाभिवृद्धिरथवाऽजीर्णं पयोमिश्रितम्॥ ९॥

दयासमालिङ्गितमागतं त्वां
क्षमान्तरालीनमिहागतानाम्।
दयस्व! नाथायि! विभो! क्षमस्व!
स्वामिन्नितीदं पुनरुक्तमेव॥ १०॥

अस्मत्पोषणसक्तचित्त! भगवन्! शैलाग्रतस्सर्वतः
संवीक्ष्यात्र महान्तमुन्नतगुण! भक्तं सपद्यागतः।
वल्मीकान्तरहो! विलीनसुतनुः सन्ताडितश्शोणितं
हन्ताङ्गादवमीस्तवाऽत्र न वयं वक्तुं पितृत्वं क्षमाः॥ ११॥

अम्भस्यपारे निरतं भवन्तं
शृण्वन्ति सर्वे श्रुतिमौलिवाक्यात्।

अम्भस्यपारे निरतं भवन्तं
सर्वेऽपि पश्यन्ति किलात्र लोकाः॥ १२॥

एकशिलायां लक्ष्म्या भूम्या युक्तं भवन्तमानम्य।
एकशिलायां राज्यं किं ते कुर्वान्नु राजानः॥ १३॥

बालाजीति मतो हि मातुरचले वालादृताग्नेः कपेः
बालामम्बुनिधेर्वहन्नुरसि तां कालाम्बुदाभाकृतिः।
कालागारनिरोधनाय भजतां लीला अनेका अयन्
कूलान्ते सरसोऽत्र भाति भगवान् जालान् क्षिपन् मेऽम्हसाम्॥ १४॥

चिलुकुर्-श्रीपुरावासश्रीनिवासस्य संस्तुतिः।
कृता श्रीनिधिना सेयं धृता दातुं श्रियं क्षमा॥ १५॥

॥ इति श्रीचिलुकुरुस्तुतिः समाप्ता॥